[३१] परस्परोपपदाच्चेति वक्तव्यम् । (म.भा. १. २७९)

परस्परस्य व्यतिलुनन्ति ॥

## नेर्विशः । (१७/२६८३)

'शेषात् कर्तरि परस्मैपदम्' (१.३.७८/२१५९) [1]इति परस्मैपदे प्राप्ते निपूर्वाद् विश आत्मनेपदं विधीयते । नेः परस्माद् विश आत्मनेपदं भवति । [2]निविशते । निविशन्ते । नेः इति किम्? [3]प्रविशति । '[4]यदागमास्तद्ग्रहणेन गृह्यन्ते' (प. ११) तेनाटा[5] नास्ति व्यवधानम् । न्यविशत[6] । नेरुपसर्गस्य ग्रहणम्, 'अर्थवद्ग्रहणे नानर्थकस्य ग्रहणम्' (व्या.प. १) इति । [7]तस्मादिह न भवति, मधुनि विशन्ति भ्रमराः[8] ॥

## परिव्यवेभ्यः क्रियः । (१८/२६८४)

'डुक्रीञ् द्रव्यविनिमये' (धा.पा. १४७४) । ञित्वात् कर्त्रभिप्राये क्रियाफले सिद्धमात्मनेपदम् । अकर्त्रभिप्रायार्थोऽयमारम्भः । [9]परिव्यवेभ्य उत्तरस्मात् क्रीणातेरात्मनेपदं भवति । परिक्रीणीते । [10]विक्रीणीते । अवक्रीणीते । पर्यादय उपसर्गा गृह्यन्ते तेनेह न भवति, बहुवि क्रीणाति वनम्[11] ॥

## विपराभ्यां जेः । (१९/२६८५)

'शेषात् कर्तरि परस्मैपदम्' (१.३.७८/२१५९) इत्यस्यापवादः । [12]विपरापूर्वाज्जयतेर्धातोरात्मनेपदं [13]भवति । विजयते । पराजयते । विपराशब्दावुपसर्गौ गृह्येते साहचर्यात् । तेनेह न भवति, बहुवि[14] जयति वनम्, परा जयति सेना (म.भा. १.२७९) इति[15] ॥

## आङो दोऽनास्यविहरणे । (२०/२६८६)

अकर्त्रभिप्रायार्थोऽयमारम्भः । आङ्पूर्वाद् [16]ददातेरनास्यविहरणे वर्तमानादात्मनेपदं भवति । विद्यामादत्ते[17] । अनास्यविहरणे इति किम्? आस्यं व्याददाति ।

[३२] आस्यविहरणसमानक्रियादपि प्रतिषेधो वक्तव्यः । (म.भा. १.२७९)

विपादिकां व्याददाति । [18]कूलं व्याददाति (म.भा. १.२७९) ।

[३३] स्वाङ्गकर्मकाच्चेति वक्तव्यम् । (म.भा. १.२७९)

इह मा भूत्, व्याददते पिपीलिकाः पतङ्गस्य मुखम्[19] (म.भा. १.२७९) ॥

---

1. इति नास्ति फ, परस्मैपदे नास्ति ग. 2. निविशेते क.ड. 3. आविशति फ.ग. 4. तदागमाः क.ह, ग्रहणेनैव ब.क. 5. अटा नास्ति ग, अटा व्यवधानेऽपि भवति फ. 6. इति इत्यधिकम् क. 7. तस्मात् नास्ति अ. 8. इति इत्यधिकम् फ.ह. 9. परि वि अव इत्येभ्यः क्रीणातेः फ. 10. विक्रीणीते नास्ति ब. 11. इति इत्यधिकम् क.ह, परिव्यवेभ्यः इति किम्? निष्क्रीणाति इत्यधिकम् ह. 12. वि परा इत्येवंपूर्वात् जयतेरात्मनेपदं फ. 13. विधीयते ग. 14. जयते ब. 15. विपराभ्यामिति किम्? जयति, अभिजयति इत्यधिकम् अ. 16. दाञः अ.न्या. प.मं., ददातेः नास्ति फ. 17. धनमादत्ते इत्यधिकम् क.ड.ग.ह. 18. उदाहरणमिदं नास्ति फ. 19. इति इत्यधिकम् क.ड.फ.